International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2025; 2(3): 95-100
© 2025 IJMH
www.themultijournal.com
Received: 05-06-2025
Accepted: 27-06-2025
Publish : 28-06-2025

**ऋतुपर्णा गायेन**
शोधच्छात्रा,अद्वैतवेदान्तविभागः,
राष्टियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**ऋतुपर्णा गायेन**
शोधच्छात्रा,अद्वैतवेदान्तविभागः,
राष्टियसंस्कृतविश्वविद्यालयः,
तिरुपति

# उपनिषदनुसारेण आत्मनः अवस्थाः निरुपणम्

**ऋतुपर्णा गायेन**

**शोधसारः(Abstact) –**

सुविदितमेव एतत् विवश्चिदपश्चिमानां यत् लोके द्विविधं वस्तु वर्तते। एकः आत्मा अपरः अनात्म इति अस्यैव विभागस्य दृक् दृश्यम् इत्यपि नामान्तरं वरीवर्ति। आत्मा हि **"सत्यं ज्ञानम अनन्तं ब्रह्म"**[1] **"विज्ञानम् आनन्दं ब्रह्म"** इत्यादि श्रुत्या ब्रह्मशब्दवाच्यस्य ज्ञानरूपत्वेन अबिधानात् यत् तस्यैव यत् साक्षात् अपरोक्षात् **"ब्रह्म यः आत्मा"**[2] इति श्रुत्या दृक्स्वरूपत्वस्य आत्मत्वस्य च प्रतिपादनात् च। ब्यतिरिक्तस्य सर्वस्यापि प्रपञ्चस्य दृश्यत्वस्य सर्वानुभवसिद्धत्वात् च। अनयोः एव वस्तुनोः ज्ञानरूपत्वं तदभावे पुरस्कृत्य चेतनम् अचेतनम् इति चेतनं जडम् इति च विभागः प्रमाणिकेषु उपलभ्यते।

**आत्मा -** तदेतस्मिन् द्विविधे अपि वस्तुनि आत्मा एव सत्यः। पूर्वोपदर्शितश्रुत्या **"सदेव सम्यैदमग्र आसीत् एकम एव अद्वितीयम"**[3] इति श्रुत्या च तस्य सत्यत्वावगमात् । सत्यमिति हि यत् स्वरूपात् न व्यभिचरति तत् उच्यते। उक्तं हि भगवत्पादैः **"सत्यमिति यद्रुपेण यत् निश्चितं तद्रूपं नव्यभिचरति तत् सत्यम् । यद्रूपेण यत् निश्चितं तद्रूपं व्यभिचरत् अनृतम् उच्यते"**[4] इति अनेन भाष्यवाक्येन विकारं यः न प्राप्नोति स्वं रूपं कदाचित् अपि न जहाति तत् सत्यं इति लोकप्रसिद्धिः / लोकिकानाम् एव परीक्षा प्रदर्शिता।

**अनात्मा -** आत्मव्यतिरिक्तः अनात्मा तु तस्य न भवितुमर्हति। स हि कार्यरूपतया एव उपलभ्यमानः प्रत्यक्षादिना आगमिकेन च प्रमाणेन। कार्यस्य च कारणम् एकं रूपं भवति। उत्पत्तेः प्राक् कार्यस्य कारणात्मत्वात्। उत्पत्यनन्तरमपि तत्कारणात्मतां न व्यभिचरति। लयानन्तरं कारणात्मकम् अवश्यं भवति। स्वीयं रूपं च घटपटादिरूपं असाधारणमपि अस्यास्ति। तदपि च रूपं भिन्नभिन्नमेव परिलक्ष्यते। सकव्था अपितु स्वरूप व्यभिचारः कार्यस्य लक्ष्यते। कारणात्मना तु अथवा कारणं च त्रिषु कालेषु अविषिष्टं भवति। अतः कार्यम् असत्यं कारणम् एव सत्यम् इति निर्णेतव्यं भवति। कारणं च ब्रह्मैव आकाशादिक्रमेण सर्वस्यापि प्रपञ्चस्य इति **"तस्मात् वा एतस्मात् आत्मनः आकाशः सम्भूतः "**[5] इति श्रुत्या अवगम्यते । ततश्च ब्रह्म कारणम् इति सत्यम । प्रपञ्चस्तु कार्य इति असत्यः इति सम्पन्नमम् अत एव श्रुतिः **"वाचारम्भणं विकारः नामधेयं मृत्तिका इत्येव सत्यम्"**[6] इति उदाहृत्य आह सदेव (परम मूलकारणम् एव) सत्यम् इति। अतः एव च श्रुतिः आत्मनं सत्यम् आह **"अतः अन्यत् आर्तम्"**[7] इति। अतः अस्मात् ज्ञानरूपात् आत्मनः अन्यत् जगत् सर्वम् अपि आर्तं विनाशि इति श्रुतिवाक्यार्थाः। विनाशात् चस्वरूपव्यभिचारः सूचनीयः अर्थः। तेन च असत्यता ज्ञापनीयोऽर्थः। ततश्च आत्मव्यतिरिक्तस्य अनात्मनः असत्यत्वं श्रुत्युपादितम् - न्यायानुमतं च इति सिद्धम्।

**अध्यासः -** ततश्च आत्मनः सत्यत्वेन प्रपञ्चस्य कल्पितत्वं पर्यवसन्नं भवति। असत्यस्य अकल्पितस्य शशश्शृङ्गादेः प्रतीतिगोचरत्वाभावात् च भ्रमः इति अर्थः लोकप्रसिद्धः स च भ्रमः सत्यं वस्तु विना न सम्भवति तथा च उक्तं भाष्ये **"शुक्तिका हि रजतवत् अवभासते एकः चन्द्रः सद्वितीयत्व वत्"**[8] इति अतः एव तैरेव उक्तं सत्यस्य वस्तुनः मिथ्यावस्तुसम्भेदावभासः अध्यासः इति तत्र ततश्च कल्पनायां सत्यमेव वस्तु कल्पितवस्तुतादात्म्येन प्रतीयते इति सिध्यति। अध्यासे च अस्मिन् सत्यं वस्तु अधिष्ठानम् इति गीयते। कल्पितं वस्तु आरोप्यम् इति व्यवह्रियते।

ननु च कोऽयं अनात्मा यः असकृत् कल्पितः इति प्रपञ्चः इति कार्यमति व्यवहारपथम् अधिरोहति इति चेत् उच्यते अन्तःकरणप्रभृति हेदान्तं परमाणु प्रभृति पर्वतान्तं सर्वमेव विकारजातमत्र कल्पितमिति सङ्गण्यते समूलम्।

**मूलम् -** ननु अस्याः कल्पनायाः मूलं किम् इति चेत् उच्यते। अज्ञानमेल मूलम् अस्याः कल्पवायाः इति उक्तं हि श्रुत्या एव **"तद्यथा हिरण्यतिधि निहितं अक्षेत्रज्ञाः उपरि उरपि सञ्चरन्तः न विन्देयुः एवम् एव इमाः सर्वाः प्रजाः अहरहः गच्छन्त्यः एतं ब्रह्मलोकं नविन्दन्ति अनृतेन हि प्रत्यूढाः"**[9] इति। अनेन श्रुतिवाक्येन सत्यस्य आत्मनः स्वरूपमनृतेन अज्ञानेन प्रच्छादितं भवति इति प्रतिपादेन अनृतभुतप्रपञ्चविक्षेपाः अपि प्रदर्शिताः एव भवन्ति। अज्ञानस्य हि द्वे शक्ती अवरणशक्तिः विक्षेपशक्तिः च इति एतया शक्तिद्वय्या अज्ञानम् आत्मस्वरूपम् आवृत्य अनात्मानं प्रपञ्च विक्षिपति इति गम्यते।

**अनादिता -** ननु अज्ञानम् इदं सत्यमसत्यं वा यदि सत्यं तर्हि आत्मा एक एव सत्यः इति कथनं विरुद्धम् इति आगच्छति। यदि च असत्यं तर्हि तदपि कल्पितम◌िति वक्तव्ययम्। तर्हि तस्य कल्पनायाः मूलं किम◌िति वक्तव्यम्। तन्मूलं पुनः सत्यमसत्यं वा इति प्रश्नपरम्परायाम् अनवस्था प्राप्नोति इति चेत् न। अज्ञानम् इति इदम् अनादि एव न तु सादि न वा सत्यम्। अतः च अनादित्वात् अज्ञानस्य नायं विकल्पः प्रसङ्गमर्हति। अनादित्वे अपि ज्ञाननिवर्त्यत्वात् तस्य कल्पितत्वं न विरुध्यते। एते न प्रपञ्चस्य कल्पितत्वे कल्पनां प्रति दोषस्य संस्कारस्य च कारणत्वे अविद्यारूपदोषस्य लाभे सत्यपि संस्कारस्य अलाभः एव। यदि संस्कारः प्रमाजन्यः अङ्गीक्रियते तर्हि तद्विषयषस्य प्रपञ्चस्य सत्यत्वापातः। यदि तु भ्रमजन्यः संस्कारः उररीक्रियते तदा प्राथमिकभ्रमे कारणीभूतस्य संस्कारस्य अभावात् भ्रमाभावप्रसङ्गः इति विकल्पः। दूरापास्तः भवति। यतः अज्ञानस्य अनादित्वे तत्कृतस्य संसारित्वस्यापि प्रवाहानादित्वं सम्भवति। ततश्च प्राथमिकः भ्रमः एव नास्ति इति सर्वोऽपि संस्कारः भ्रमजन्य एव इति सिध्यति।

अतः एव रागस्य अनुभूतविषयकमनापरपर्यायस्य संसाकरकारणत्वम् अङ्गीकुर्वाणाः नैयायिकाः अपि संसारमनादिम् एव अङ्गीकृत्य तत्कतृतं संसारं व्युत्पादयन्ति। अतएव आचार्यप्रणीतं न्यायोपबृंगितं सूत्रम् **"वीत सरागजन्मदर्शनात्"**[10] इति। सरागजन्मदर्शनात् संसारस्य अनादित्वम्। अतः प्राथमिकजन्मनि कथं रागः इति प्रश्नस्य कथञ्चिदपि उत्थानं नास्ति इति तद्भिप्रायः। स च उक्तेन प्रकारेण सङ्गच्छते। अतएव च **"मूले मूलाभावात् अमूलं मूलम◌िति साङ्घसूत्रमपि सङ्गच्छते।"**

**अहं मम इति अध्यासः -** सोऽयं अविद्यानिबन्धनः अध्यासः अविद्याकृतत्वात् एव अनर्थः। अनर्थत्वात् एव निरसनीयः। निरासाय च अस्य स्वरूपं कारणं च साधु ज्ञातव्यं भवति। कारणं च अज्ञानाख्यम् एतावत्पर्यन्तम् उपापादितम◌ेव। स्वरूपमस्य अहं मम इति मन्तव्यम् अनात्मा प्रपञ्च हि द्वेधा भासते। अन्तःकरणादि करणग्रामसहितं शरीरं तदतिरिक्तं कार्यकरणसङ्घातः इति शब्देन शास्त्रे अभिधीयते। अयञ्च अहम् इति अध्यासविषयः। तदतिरिक्तः सर्वः अपि प्रपञ्चः मम इति अभिमानविषयः। अयमेव अहं ममाभिमानः इति प्रसिद्धिं गतः अध्यासः। मम इति तु सर्वस्मिन् प्रपञ्चे अध्यासः अस्त्येव अनुकूलः इति प्रतिकूलः इति उपेक्षणीयः इति वा अन्यदेतत्।

तस्यैतस्य अहं ममाभिमानस्य दूरीकरणाय समूलस्य अस्य अध्यासस्य निरसनाय च बहवः प्रकाराः वेदान्तैः उपनिषच्छब्दाभिधायैः अनसूताः। तेषु अन्यतमः प्रकारे आत्मनः प्रपञ्चज्ञानावस्थां जाग्रदवस्थां निरूप्य तदनु इन्द्रियाणां बाह्यानां उपरमे अन्तारिन्द्रियस्य अनुपरमे च स्वप्नावस्था जाग्रद्वत् एव उपपाद्य आस्यापीन्द्रियस्य उपरमे केवल◌ाज्ञानस्य कारणस्य अवस्थाने सुषुप्तिः नाम अवस्था भवति यस्याम् आत्मानन्द◌ोऽस्ति इति ज्ञातुं शक्यते इति प्रतिपाद्य अवस्थानां तिसृणाम् अपि अन्ययोन्यव्यभिचारात् असत्यत्वं दृढीकृत्य अवस्थावत्वेन भासमानः आत्मा एव तस्य इति निरूपणं दरीदृश्यते।

अस्मिन् प्रकारे अपि माण्डूक्योपनिषदा अनुसृतः पन्थाः अतीव विलक्षणः विचक्षणः च वर्तेत। तत्र हि आत्मानं चतुर्धाविभज्य चतुष्पात्वम◌ात्मनः प्रतिज्ञाय एकैकां पूर्वोक्तामवस्थां एकैकपादत्वेन निरुप्य एतादृश पादरहितः शुद्धः आत्म◌ैव चतुर्थः पायुः इति निरूपितम्। सोऽयं निरूपणप्रकारः भगवत्पादाचार्यप्रभृतिभिः सर्वैः अपि बहुधा प्रपञ्चितः। व्याख्यातृभिः बहुधा व्याख्यातः च।

अत्र तानि व्याख्यानानि अनुरुध्य माण्डूक्योपनिषदं पुरस्कृत्य अन्याः उपनिषदः अपि यथासम्भवं विचार्य आत्मनः चत्वारः पादाः के के भवन्ति इति निरुप्य आत्मनः शुद्धत्वं सत्यत्वं अनात्मनः सर्वस्यापि कल्पितत्वं स्थापनीयं इति प्रयत्नः विधीयते। एवं सर्वासाम् अवस्थानाम् उपाधि प्रविलापे शुद्धम् आत्मा सिध्यति । आत्मनः चतस्रः अवस्थाः यथा- 1. **जागरित◌ावस्था** - तत्र वर्तमानस्य आत्मनः वैश्वानरः विश्वः इति नाम।

2. **स्वप्नावस्था** - तत्र वर्तमानस्य आत्मनः तैजसः इति नाम।

3. **सुषुप्तिवस्था** - तत्र वर्तमानस्य आत्मनः प्राज्ञः इति नाम।

4. **तुरीयावस्था** - अत्र तु आत्मनः शुद्धत्वात् नाम नास्ति।

समष्यभिप्रायेण तु जाग्रदवस्थोपाधिकः विश्वः। सकलश्थूल-प्रपञ्चोपाधिके विराट् पुरुषे अन्तर्भवति। स्थूलोपाधिकत्वसामान्यत्। स्वप्नावस्थोपाधिकः तैजसः समस्तबुध्युपाधिके हिरण्यगर्भे अन्तर्भवति। सूक्ष्मोपाधिकत्वसाम्यात्। सुषुप्त्यभिमानी प्राज्ञस्तु मायोपाधिके ईश्वरे अन्तर्भवति। उभयोऽपि कारणोपाधिकत्वस्य समत्वात्। प्रतिलापनप्रकारे अपि स्थूलसूक्ष्मादीनां प्रविलापनसमये व्यष्टिसमष्टीनाम् अपि उपाधीनां प्रविलापने क्रियमाणे सर्वत्र शुद्धम् आत्मस्वरूपं सिध्यति। इदं प्रतिपत्ति सौकर्यमभिप्रेत्यैव व्यष्टिसमष्टिभेदेन विश्वादीनां विराजीदिभिः एकत्वं प्रदर्श्यते। ततः च व्यष्ट्यभिप्रायेण विश्वः तैजसः प्राज्ञः इति अवस्थासु तासु व्यवह्रियमाणः आत्मा।

**अवस्थात्रयपरिचयः -** जीवस्य तावत् जाग्रत्, स्वप्नः, सुषुप्तिश्च इति अवस्थात्रयं विद्यते। तदुक्तं वेदान्तपरिभाषायाम् **- "स च जीवः जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्"**[11] इति। तच्च अवस्थात्रयं न जीवस्य स्वरूपलक्षणम् अपि तु तटस्थलक्षणमिति वक्तव्यम्। स्वरूपलक्षणं तु चिद्रूपादिकमति अन्यदेतत्। तत्र इन्द्रियजन्य-ज्ञानावस्था जाग्रदवस्था इति प्रथमावस्थायाः स्वरूपं निर्देष्टुं शक्यते। यस्यामवस्थायामस्माकमिन्द्रियदेहव्यापाराः सम्पाद्यन्ते। इन्द्रिय-जन्यविषयगोचरापरोक्षान्तः करणवृत्त्यवस्था स्वप्नावस्था। अस्याम् अवस्थायामिन्द्रियव्यापाराभावेऽपि अन्तःकरणवृत्त्या रथगजादयः विषयाः विज्ञायन्ते। सुषुप्तिर्नाम अविद्यागोचराविद्यावृत्त्यवस्था इयं च सुषुप्तिः अज्ञानकार्यलिङ्गशरीरप्रविलारूपा। अस्यां च सुषुप्तौ अज्ञानकार्यप्रविलयात् सत्स्वरूपम् आपद्यते जनः। यस्य ज्जीवः मन आदि संसर्गकृतं जीवरूपं परित्यज्य स्वं सद्रूपं यत्पारमार्थसत्यं तद् अपिगतो भवति। तस्मात् स्वपितीति ब्रुवते लौकिकाः। स्वम् आत्मानं हि अपीतो भवति।

एकोऽपि आत्मा अवस्थात्रयभेदेन त्रिधा व्यपदिश्यते। जाग्रदवस्थायां स्थूलशरीरभिमानी आत्मा विश्वः वैश्वानर इति उच्यते। स्वप्नावस्थायां सूक्ष्मशरीराभिमानी आत्मा तैजस इत्युच्यते। सुषुप्त्यवस्थायां कारणशरीराभिमानी आत्मा प्राज्ञ इति ज्ञायते। इदं सर्वं व्यष्ट्यभिप्रायेण समष्ट्यभिप्रायेण तु जाग्रदवस्थोपाधिकः विश्वः सकलस्थूलप्रपञ्चोपाधिके विराट् पुरुषे अन्तर्भवति। स्थूलोपाधिकत्वसामान्यात्। स्वप्नावस्थोपाधिकः तैजसः समस्त-वुध्युपाधिके हिरण्यगर्भे अन्तर्भवति सूक्ष्मोपाधिकत्वसाम्यात्। सुषुप्त्यभिमानी प्राज्ञस्तु मायोपाधिके ईश्वरे अन्तर्भवति। उभयोऽपि कारणोपाधिकत्वस्य समत्वात्। प्रविलापन प्रकारे अपि स्थूलसूक्ष्मादीनां प्रविलापनसमये व्यष्टिसमष्टीनाम् अपि उपाधीनां प्रविलापने क्रियमाणे सर्वतः शुद्धम् आत्मस्वरूपं सिध्यति। इदं प्रतिपत्ति सौकर्यमभिप्रेत्यैव व्यष्टिसमष्टिभेदेन विश्वादीनां विराजादिभिः एकत्वं प्रदर्श्यते। ततः च व्यष्ट्यभिप्रायेण विश्वः तैजसः प्राज्ञः इति अवस्थासु तासु व्यवह्रियमाणः आत्मा समष्ट्यभिप्रायेण विराट, हिरण्यगर्भः, ईश्वर इत्यपि निगद्यते। एवम् अवस्थानां परिचयः। इदानांमवस्थानां विशिष्टपरिशीलनं करिष्यामः।

**जाग्रदवस्था -** इन्द्रियैः शब्दादिविषयज्ञानं नाम जाग्रदवस्था। अस्याम् अवस्थायां भ्रूमध्यगतोऽयं विज्ञानात्मा जीवः विज्ञानमयकोशस्थो व्यष्टि रूपस्य देहस्य निश्चयात्मिकां बुद्धिम् अधिष्ठाय स्थूलशरीराभिमानी सन् चिदाभासो व्यवहारिको 'विश्वः' तथा 'वैश्वानरः' नाम्ना अभिधीयते।

**"जागरितस्थानो बहिः प्रज्ञः । सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः"**[12]

इति अस्य प्रतिपादकमपनिषद्वाक्यम्। इदानीमात्मनः प्रथमपादः अर्थात् जाग्रदवस्था। तद्विषये वर्णयते। इदानीम् उपनिषद्वाक्ये एकैकं पदमादाय आत्मनः इदं जाग्रदवस्थारूपं विवेचयामः –

**जाग्ररितस्थानम् - "जागरितं स्थानमस्येति जागरितस्थानः" इति भगवातपादाः शङ्करभाष्ये प्रतिपादितम्"**[13]।

1. "यत्र स्थित्वा जीवो जागर्त्ति सत्स्थानं जागरितं। तदेव स्थानं यस्य तादृशोऽयं प्रथमः पादः। तच्च स्थानं दक्षिणस्य चक्षुषोऽग्रभागो दक्षिणाक्षिमुखे विश्व इत्युक्ते। तत्र स्थित्वाऽयं परमात्मा जीवं स्थूलविषयान् भोजयतीत्यर्थः।"[14] इति आनन्दद्भाष्यवचनम्।
2. अत्र जाग्ररितस्थानविषये आनन्दगिरिः व्याख्यायाम् एवं प्रतिपादितम् - "परमार्थत श्चतुष्पादत्त्वाभावेऽपि काल्पनिक-मुपायोपेयभूतं पादचतुष्टयमविरुद्धमित्याभिप्रेत्याऽऽद्य पादं व्युत्पादयति आहेत्यादिना स्थानमस्येत्यभिमानः"[15]इति।
3. जागरितस्थानविषये गूढटीकाटिप्पणी एवं प्रतिपादयति "यत्र स्थिते सति जीवो जार्गति तद्दाक्षिणाक्षिमुखं जागरितम्। अधिकरणे 'क्त' प्रत्ययः। तदेव स्थानं यस्य सः जागरितस्थानः तथा दक्षिणाक्षिमुखस्थान"[16] इति उक्तम्।
4. "जागरितस्थानः जागर्त्यत्रेति जागरितमधिकरणे क्तः जाग्रदवस्था तत्स्थानं यस्य स तथोक्तः।"[17] जागतरिस्थानः इति विषये भाष्यविवृत्तिकारः एवं प्रतिपाद्यति।
5. जागरितस्थानविषये भाष्यार्थरत्नावलिग्रन्थे एवं उक्तम् "यत्र स्थित्वा जाग्रदवस्थां प्रवर्तयति। तदु दक्षिणाक्षि जागरितम् तच्च तत्स्थानमधिष्ठानं यस्य स जागरितस्थानः। यद्वा जागरिताख्यं स्थानं अवस्था यस्य स जागरितस्थानो जागृदवस्थाधि-पतिरित्यवस्थाधिष्ठानयोरुक्तः"[18] इति।
6. ऑकारवाच्यपरब्रह्मणः प्रथमपादं विशिनष्टि – जागरितस्थान इति। जागरितं स्थानं यस्य जागरितस्थानः। जाग्रद्दशानिर्वाहकः। ब्रह्मशब्दितस्यानिरुद्धस्यैव जाग्रद्दशानिर्वाहकत्वम्।"[19] इति जागरितस्थानविषये प्रतिपदार्थदीपिकामतम्।
7. जागरितस्थान विषये प्रकाशिकाकाराः एवं प्रकारेण प्रतिपादयन्ति "जागरितं स्थानं यस्य स जागरितस्थानः, जाग्रद्दशानिर्वाहक इत्यर्थः। जागरिते ब्रह्मा इति ब्रह्माशब्दितस्य अनिरुद्धस्यैव जाग्रद्दशानिर्वाहकत्वात्।"[20] इति ।
8. तथा च कूरनारायणभाष्यम् जागरितस्थान विषयेः एवं अस्ति यत्र स्थित्वा जागर्ति तच्चक्षुर्जागरितम्। अधिकरणे 'क्तः'। तदेव स्थानं यस्य स जागरितस्थानः। चक्षुः स्थान इत्यर्थः।[21]
9. सुबोधिनीकाराः "जागरितस्थानविषये एवं वदन्ति जागरितं स्थानं यस्य स तथोक्तः। अधिष्ठाय चैतन्यप्रभया चक्षुरादि रूपाद्यर्थाननुभवतीति बहिष्मज्ञोऽयम्।"[22] इति।

तदेनन सर्वेणापि व्याख्यानेन इदं यत् चैतन्यं शुद्धमेव सत् जाग्रद्दशोपाधिकं भवति तदेव जागरितस्थानः इति शब्दस्य अर्थः इति। अनेन च अवस्थायाः कल्पितत्वं तद्वतः आत्मनः सत्यत्वं च सिद्ध्यति। ततश्च प्रविलापेन जाग्रदुपाधेः तुरीयस्य शुद्धस्य आत्मनः प्रतिपत्तिः भवति इति कृत्वा शुद्धात्व प्रतिपत्तिशेषत्वम् अपि अस्य जागरित स्थानस्य अस्ति इति।

एतावत्पर्यन्तम् आत्मनः चतुष्पात्वम् उपनिषदा प्रतिपाद्यं व्यवस्थाप्य, तत्र प्रथमं पादं जाग्रदवस्थारूपम् उपापादानम् यस्याः ज्ञाने सति आत्मनः शुद्धरूपता ज्ञायते सा अवस्था अवश्यं निरूपणीया इति श्रुतेः प्रवृत्तिः। अतः द्वितीयावस्था स्वप्नावस्था तया निरूपिता। तामनु निरूपणं करिष्यामः। तत्र सर्वप्रथमम् अन्तःकरणं सर्वव्यवहारहेतुभूतमिति सर्वेषामविवादमेव तच्च वृत्तिभेदेन मनोबुद्धध्यहंकारचित्तात्मकम्। संकल्पविकल्पात्मिकां वृत्तिं मन इति निश्चयात्मिकाम् वृत्तिं बुद्धिः, इति अभिमानात्मिकां अन्तःकरणवृत्तिं यदा करोति तदा अहंकारः इति अनुसन्धानात्मकवृत्तिमदन्तःकरणं चित्तमिति च ख्यातम्। चतसृणां वृत्तीनां सर्वदा प्रवृत्तिः न भवति। इदानीं अस्मिन् स्वप्नावस्थाविषये आलोचना करिष्यामः। इमाः वृत्तयः यदा इन्दियेण भवन्ति तदा जाग्रदवस्था इन्द्रियं विना यदाऽन्तःकरणवृत्तिः भवति तदा स्वप्नावस्था।

**स्वप्नावस्थाः -** निद्रायां करणेषु उपरतेषु सत्सु जागरित संस्कारेण जायमानं निद्रादिदोषप्रयोज्यं ज्ञानं भवति। इयमवस्था स्वप्नावस्था इति उच्यते। अस्यामवस्थायामसौ जीवात्मा व्यष्टिसूक्ष्मशरीरे नाडीमध्यगतः सन् मनः अधिष्ठाय तैजसत्वं प्राप्नोति, वासनारूपकं जगद्वैचित्र्यं स्वभासा भासयन् यथेप्सितं स्वयं भुंक्ते। असौ सूत्रात्मा

जीवः प्रातिभासिकत्वेन स्वप्नकल्पितः "तैजसः" इत्यभिधीयते। अस्य प्रतिपादकं माण्डूक्योपनिषदः वचनम् इत्थम् अस्ति।

**स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः**

**प्रविविक्तभुक् तैजसः द्वितीयः पादः।।**[23]

स्वप्नस्थानः यत्र स्थित्वा जीवः स्वप्नपदार्थान्पश्यति स स्वप्नः। तदेव स्थानं यस्य सस्वप्नस्थानः, कण्ठदेशस्थ इत्यर्थः। अन्तप्रज्ञः अन्तश्शब्दोऽत्र बाह्यार्थज्ञानजन्यवासनापरिणामरूपार्थपरः। तान् अन्तस्थितान् वासनामयार्थान् प्रज्ञापयति जानाति चेत्यन्तःप्रज्ञः। प्रज्ञ इति जानतेः क्तः। सप्ताङ्गः एकोविंशतिमुखः इति प्राग्वत्। प्रविविक्तभुक्। वासनामयतया बाह्यार्थेभ्यो विविक्तान् स्वाप्नार्थान् भुङ्क्ते भोजयति चेति प्रविविक्तभुक्। तेजोमयचित्रस्थतया चित्तसम्बन्धित्वेन तैजसनामा आत्मनो द्वितीयः पादः द्वितीयं रूपमित्यर्थः। इदं च व्यष्टिरूपं श्रुत्या प्रतिपादितम् समष्टिरूपं तु सर्वशूक्ष्मशरीरोपाधिकं सूत्रसंत्रितं प्राणाख्यं हिरण्यगर्भम् इति तत्वम् इति मन्तव्यम्।

**स्वप्नस्थानः – 1.** "स्वप्नः स्थानमस्य तैजसस्येति स्वप्नस्थानः। जाग्रत्प्रज्ञाऽनेकसाधना बहिर्विषयेणावभासमाना मनः स्पन्दनमात्रा सती तथाभूतं संस्कारं मनस्याधत्ते। तन्मनस्तथा संस्कृतं चित्रित इव पटो बाह्यसाधनानपेक्षमविद्याकामकर्मभिः प्रेर्यमाणं जाग्रद्वदवभासते इति स्वप्नस्थानम्"[24] इति। भगवत्पादानां भाष्यम् ।

2.अनेन भाष्यव्यख्यानेन जाग्रद्वस्तुविषकभावना विशिष्टस्य पुरुषस्य जाग्रद्विदेव यत् ज्ञानम् इन्द्रियेषु उपरतेषु अनुपरते मनसि भवति तत् ज्ञानं स्वाप्नज्ञानं कथ्यते। न चैवं संस्कारजन्यमात्रत्वात् इदं स्मृतिरूपम् इति। संस्कारजन्यमात्रजन्यत्वभावात्। स्मृतित्वे हि संस्कारमात्रजन्यत्वं वा स्वाप्नज्ञाने। नान्तः इदं ज्ञानं स्मृतिरूपम्। किञ्च जाग्रदवस्थार्या घटं पश्यामि इत्याद्यनुभवेन घटसात्कारस्य तज्जनकेन्द्रियादेः सिद्धिः सर्वानुमता अयं च अनुभवः गजं पश्यामि इत्याद्याकारकः स्वाप्ने अपि समानः। अतः अनुभवानुरोधेन स्वप्नावस्थायामपि साक्षात्कारः गजादीनाम् एष्टव्यः। तत्र च इन्द्रियाणां बाह्यानाम् उपरतत्वात् अन्तःकरणेन संस्कारसघ्रचीनेन गजादेः साक्षात्कारः इति अनुभवबलात् अङ्गीकर्तव्यम्। कर्मणां सहकारिकारणत्वम् अपि आनुभविकमेव। एतादृशस्वप्नज्ञान-वानात्मा तत्काले स्वप्नस्थानः"[25] इति श्रुत्या व्यपदिश्यते इति प्रतीयते।

3."स्थानं पूर्ववत् द्रष्टुर्ममाभिमानस्य विषयभूतमिति यावत् स्वप्नपदार्थनिरूपयितुं तत्कारणं निरूपयति जाग्रदित्यादिना। तस्याः स्वप्नाद् वैधर्म्यार्थ"[25] स्वप्नस्थानमिति अनेन च जाग्रत् स्वप्नयोः भेद प्रदर्शनं भाष्ये कृतमिति व्याख्यायते।

4.प्रतिपदार्थदीपिकाराः स्वप्नस्थानविषये एवं वदन्ति यत् "स्वप्नं स्वप्नोत्पत्तिस्थानभूतं कण्ठं यस्य स्थानं सः स्वप्नस्थानः"[26] इति। अनेन स्वप्नस्थानस्य जीवस्य विशेषस्थानं प्रदर्शितं भवति।

5."स्वप्नस्थानो यत्र स्थाने पुरीतततो नाड्या वर्तमानो जीवः ईश्वरसृष्टान् स्वाप्नान् सूक्ष्मान् पदार्थान् अनुभवति तत्स्थानं स्वप्न इत्यच्यते। "स्वप्न एव स्थानं यस्य स स्वप्नस्थानो मनः प्रेदशस्थः।"[27] इति स्वप्नस्थान विषये आनन्दभाष्ये वर्णितम्।

6.सुबोधिनीकारैः स्वप्नस्थानः इति विषये उक्तम् "अभिसम्बन्ध नाडीविशेषं स्वप्नमनुभवति। अतः स्थानविशेषसम्बन्धादुच्यते"[28] इति स्वप्नस्थानम्।

7."यत्र स्थित्वा जीवः स्वप्नपदार्थान्पश्यति तत्स्वप्नप्रस्थानम् तदेवस्थानं यस्य सः कण्ठदेशस्थ इत्यर्थ"[29] इति मतम् कूरनारायणभाष्ये। अयं च पक्षः प्रतिपदार्थदीपिका व्याख्यानेन प्रदर्शितः एव पूर्वम्।

8."स्वप्नस्थानः यत्र स्थित्वा स्वाप्नपदार्थान् जीवस्य प्रदर्शियति तत् स्वप्नम्। तदेव स्थानं यस्य स तथा कण्ठदेशस्थान इत्यर्थ" इति गूढकर्तृका टीकाकाराः। तदेभिः व्यख्यानैः नाडीविशेषस्थानस्थः कष्ठदेशस्थः वा जीवः स्वप्नस्थानः इति शब्देन उच्यते स्वाप्नाप्रदार्थाः अनुभवेन इति लभ्यते।

अद्वैतसिद्धान्ते सुषुप्तिविचारः अत्यन्तं प्रामुख्यं भजते। अनेन मनोवैज्ञानिकविचारेण सिद्धान्तपरिपुष्टिः संपादितः। मनसि एव जीवेनात्मना अनुप्रवेशः परस्याः देवतायाः यथा प्रतिबिम्बरूपेण आदर्शपुरुषप्रवेशः यथा वा जलादिषु सूर्यप्रेवशः इत्युक्तम्। तन्मनः आत्मनः अन्नमयम्। अतः तस्य प्रवृत्तिः कीदृशी, कथं वा मनोराज्यविजृम्भणं कथं सुषुप्तौ मनसः लयः इत्यादिविषयाणां विचारेण तस्य स्वरूपावबोधः भवति।

**सुषुप्त्यवस्था** - सर्वविषयाणां ज्ञानाभावे स्वरूपावस्था नाम सुषुप्त्यवस्था। अस्यामवस्थायां, यथा भ्रमणश्रान्तः शकुनिः स्वपक्षौ संहृत्य नीडाभिमुखम् अवाप्नोति, तथासौ जीवः जाग्रतस्वप्नप्रपञ्चजातं गोचरीकृत्य श्रान्तो विश्रान्त्यर्थं कारणशरीरे अज्ञानपूर्वकं स्वानन्दं भुङ्गे। सुषुप्त्यावस्थाया विषये एकम् उदाहरणं छान्दोग्योपनिषदि प्रदर्शिम्। "तद्यथा शकुनिः प्रबद्धः दिशं दिशं पतित्वा अन्यत्र आयतनं अलब्ध्वा बन्धनमेव उपश्रयते एवमेव तन्मनः दिशं दिशं पतित्वा अन्यत्र आयतनम् अलध्वा प्राणमेव उपाश्रूयते प्राणबन्धनं हि सौम्य मनः" इति।

अस्यार्थः तु एकः पक्षी सूत्रेण प्रबद्धः सन् केनचित् क्रीडार्थ दिक्षुविक्षिप्तः तत्र तत्र गत्वा शान्तः विश्रान्त्यर्थं बन्धनालाने एव पुनः प्रविश्य तत्रैव विश्रान्तिं लभते।

एवमेव मनःशब्दवाच्यः जीवः अपि जाग्रदवस्थायां स्पप्नावस्थायां च तैः तैः इन्द्रियैः उचितान् विषयान् भुञ्जानः एव तत्र सुखम् अलब्ध्वा शान्तः सन् तच्छ्रमापनुत्तये पुनः स्वं (परमात्मानं प्राणशब्दवाच्यं) प्रविश्यम् (अर्थात् च उपाधीन अविद्याव्यतिरिक्तान् सर्वान् विहाये) स्वस्थः स्वं सुखं प्राप्नोति। विश्रान्तिं च लभते इति अनेन च सुषुप्त्यवस्था स्पष्टम् एव प्रदर्शिता भवति। सुषुप्त्यभिमानी जीवः पारमार्थिकः 'प्राज्ञः 'इति कथ्यते। सुषुप्त्यवस्थायाविषये माण्डूक्योपनिषदि - "यत्र सुस्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः"[30]इति।

इदानीम् आत्मनः तृतीयपादः अर्थात् सुषुप्तिः नाम अवस्था। तद्विषये वर्णयते। उपनिषदानुसारेण एकैकं पद्मादाय विवेचयामः। यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तमिति इति सुषुप्तेः लक्षणम् -

1. अत्र "यत्र यस्मिन् स्थाने काले वा सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति। न हि सुषुप्ते पूर्वयोरिवान्यथाग्रहणलक्षणं स्वप्नं दर्शनं कामो वा कश्चनविद्यते"[31] इति। भगवत्पादानां भाष्यपङक्तिः ।

2. प्रतिपदार्थदीपिकाकाराः अपि एवं वदन्ति "यत्र सुप्तो न कञ्चन कामं कामयत इति। जीवः यत्र स्थाने सुप्तः रागादिदोषहरितः सन् न कञ्चन कामं कामयते कंचन कमपि कामं - काम्यमानमर्थं प्रार्थयते न कञ्चन स्वप्नं पश्यति अहं सुखमस्वाप्सम् इति प्रतीतेः स्वात्मानं विना कमपि स्वप्नपदार्थं न पश्यति तत्सुषुप्तं स्थानं सुषुप्तिस्थानमित्यर्थः। इदं पूर्वोक्तस्य भाष्यवाक्यस्य व्याख्यानम् इत्येव साधयति"[32]।

3. प्रकाशिकाकाराः एवं वदन्ति "यत्र स्थाने जीवः सुप्तः सन् रागादिदोषानुपहतः स्वप्नं च न पश्यति तत्स्थानं सुप्तम्। सुप्तमित्यधिकरणे 'क्त' प्रत्यय इति भावः।"[33] अत्र च सुप्तपदस्य सुषुप्तस्थानपरत्वं स्पष्टं कृतम्।

4. कूरनारायणभाष्ये एवम् उक्त "यत्र देशे सुप्तः अज्ञानावृतः सुखरूपं सुखरूपं प्राप्त इति वा। प्राज्ञेनात्मना सम्परिष्वक्त इत्यादेः कञ्चन कमपि कामं काम्यमानमर्थं न कामयते न कञ्चन स्वप्नपदार्थं पश्यति। उपलक्षणमेतत्। स्वात्मानं विना किमपि न पश्यति इत्यर्थः। तत्स्थानं सुषुप्तमित्युच्यते। सुषुप्तमेव स्थानं यस्य सः सुषुप्तस्थानः"[34] इति।

अस्मिन् आत्मनः अवस्थाविषये विचार्यते। आत्मनः चत्वारः पादाः जाग्रदवस्था, स्वप्नावस्था, सुषुप्तिवस्था तथा च तुरीयावस्था। क्रमानुसारेण प्रथम ज ाग्रतावस्थाविषये आलोचितम् द्वितीय स्वप्नावस्थाया विषये चर्चितम् तृतीय सुषुप्त्यवस्थाविषये उपस्थापितम्। इदानीं चतुर्थे आत्मनः चतुर्थपदस्य अर्थात् तुरीयावस्थाविषये प्रतिपाद्यते।

**तुरीयवस्थाः -** शुद्धः हि आत्मा उपनिषद्भिः सर्वाभिः अपि तात्पर्येण प्रतिपाद्यते इति सर्वेषां नः विदितमेव। अयं हि आत्मा शुद्धः इत्येवं कृत्वा न केनचित् प्रमाणेन समधिगन्तुं शक्यते। स्वप्रकाशत्वात् अपि केनचित् प्रमाणेन अधिगमः निर्णयस्य अस्य आत्मनः न भवितुं अर्हति। यद्यपि एवं सति वेदानान्तानाम् आनर्थक्यं प्रसज्यते एव तथापि वेदान्तैः आत्मनि कल्पितानाम् अतद्धर्माणाम् एव निराकरणं केवलं क्रियते नतु आत्मतत्त्वं प्रतिपाद्यते इति अङ्गीकारेण आत्मनः स्वप्रकाशत्वं सिद्धान्तसिद्धम् अनुभवसिद्धमेव वा अस्ति रक्षितं भवति। अतएव "नेति नेति" इत्यादिना सर्वधर्मप्रतिषेधः आत्मनः उपपद्यते। अतएव च आत्मनः परप्रतिषेधगम्यत्वं सिद्धान्तिनः सम्मन्यन्ते। प्रकृते अपि आत्मनः अवस्थाधर्मनिषेधेन अस्यैव आत्मनः शुद्धतासिद्धिः। योऽयम् आत्मा इति आत्मनः चतुर्थः पादः इति च अभिधीयते।

सोऽयम् अवस्थात्रयविवेकः तन्निषेधः च कूर्चब्राह्मणेऽपि दृष्टः। कूर्चा नाम उच्चस्थानम्। तस्मात् स्थानात् उत्थाय, अर्थात् ज्ञानित्वाभिमानं विसृज्य राजा जलकः शिष्यत्वेन याज्ञवल्क्यम् उपससाद। याज्ञवल्क्यः विश्वतैजसप्राज्ञानुवादेन नेति नेतीत्यादिना सर्वप्रतिष्ठाभूतस्य तुरीयस्य प्रतिपादनम् अकरोत्। आदौ वैश्वानरोपासनार्थाम् इन्दश्च इन्द्राणी चेति मिथुनं प्राकल्पयत्। "इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषः। "अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट्" इत्यादिना। अत्र च इन्धः एवं इन्द्रः वैश्वानरः, जाग्रदभिमानी। विराट् एव अन्नं भोग्यत्वात् इति भाष्यकाराः विवृण्वते जाग्रदवस्थायाम् अनुभूतविषया एवं अन्नं, भोज्यम् स्वप्नावस्थायाम्। इन्द्राणीन्द्रयोः संस्तावः समागमः हृदयाकाशे एवं मिथुनीभूतः पिण्ड एव तैजस इति व्यवह्रियते।

तथा च तेषां स्थूलसूक्ष्मसूक्ष्मतररूपेण आहारा अन्नभेदः "विश्वस्य जागरिताभिमनिनः तैजसे"। तस्य च स्वप्नाभिमानिनः वाक्चैः स्फुटं भवति। "एवं विद्वान् क्रमेण सर्वात्मकं प्राणम् आत्मत्वेनोपगतो भवति। तं सर्वात्मानं प्रत्यगात्मन्युपसंहृत्य द्रष्ट्युर्हि द्रष्टृभावं नेति नेत्यात्मानं तुरीयं प्रतिपद्यते। अर्थात् प्रथमतः ईश्वरत्वमापन्नः, ते पुनः तुरीये शुद्धचैतन्ये उपसंहरति। एवं च जगतः द्रष्टुः (विश्वस्यापि) द्रष्टा, प्रमातुः प्रमाता साक्षी तुरीयः भवति। तथा नेति नेतीति सकलविशेषणनिषेधेन निषेधावधितत्वभूतं यत् तुरीयं तत् प्राप्नोति इत्यर्थः। एव विजानन् अभयं जन्ममरणादिनिमित्त-भयशुन्यं प्राप्नोति साधकः, यथा जनकः प्राप्तवान्। ततश्च ब्राह्मणेन अनेन शुद्धस्य आत्मनः प्रतिपादनं सोऽयम् अवस्थात्रयविवेकः तन्निषेधः च कूर्चब्राह्मणेऽपि दृष्टः। कूर्चा नाम उच्चस्थानम्। तस्मात् स्थानात् उत्थाय, अर्थात् ज्ञानित्वाभिमानं विसृज्य राजा जलकः शिष्यत्वेन याज्ञवल्क्यम् उपससाद। याज्ञवल्क्यः विश्वतैजस-प्राज्ञानुवादेन नेति नेतीत्यादिना सर्वप्रतिष्ठाभूतस्य तुरीयस्य प्रतिपादनम् अकरोत्। आदौ वैश्वानरोपासनार्थाम् इन्दश्च इन्द्राणी चेति मिथुनं प्राकल्पयत्। "इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषः"[35]। "अथैतद्वामेऽक्षणि पुरुषरूपमेषाऽस्य पत्नी विराट्" इत्यादिना। अत्र च इन्धः एवं इन्द्रः वैश्वानरः, जाग्रदभिमानी। विराट् एव अन्नं भोग्यत्वात् इति भाष्यकाराः विवृण्वते जाग्रदवस्थायाम् अनुभूतविषया एव अन्नं, भोज्यम् स्वप्नावस्थायाम्। इन्द्राणीन्द्रयोः संस्तावः समागमः हृदयाकाशे एवं मिथुनीभूतः पिण्ड एव तैजस इति व्यवह्रियते।

तथा च तेषां स्थूलसूक्ष्मसूक्ष्मतररूपेण आहारा अन्नभेदः "विश्वस्य जागरिताभिमनिनः तैजसे"। तस्य च स्वप्नाभिमानिनः वाक्यैः स्फुटं भवति। "एवं विद्वान् क्रमेण सर्वात्मकं प्राणम् आत्मत्वेनोपगतो भवति। तं सर्वात्मानं प्रत्यगात्मन्युपसंहृत्य द्रष्ट्युर्हि द्रष्टृभावं नेति नेत्यात्मानं तुरीयं प्रतिपद्यते। अर्थात् प्रथमतः ईश्वरत्वमापन्नः, तं पुनः तुरीये शुद्धचैतन्ये उपसंहरति। एवं च जगतः द्रष्टुः (विश्वस्यापि) द्रष्टा, प्रमातुः प्रमाता साक्षी तुरीयः भवति। तथा नेति नेतीति सकलविशेषणनिषेधेन निषेधावधितत्वभूतं यत् तुरीयं तत् प्राप्नोति इत्यर्थः। एव विजानन् अभयं जन्ममरणादिनिमित्तभयशुन्यं प्राप्नोति साधकः, यथा जनकः प्राप्तवान्। ततश्च ब्राह्मणेन अनेन शुद्धस्य आत्मनः प्रतिपादनं सम्यक् कृतम्। माण्डूक्योपनिषत् अपिपादत्रयविवरणानन्तरं चतुश्पात्मनः चतुर्थ तुरीय पादं प्रतिपाद्यति। जाग्रत् स्वप्न सुषुप्तिभेदेन विश्व तैजस प्राज्ञानां वर्णनं, ततश्च चतुर्थस्य तुरीयात्मनः इति माण्डूक्योपनिषदः प्रतिपादनरीतिः ज्ञायते एव।

**उपसंहारः -** उपनिषत्सु वर्णितविषयेषु आत्मा मुख्यस्थानं भजते। एतस्यात्मनः अवस्थाचतुष्टयं वर्तते। अस्मिन् आत्मनः

अवस्थाचतुष्टसम्बन्धे विचारः मया उपन्यस्तः। आत्मनः जाग्रदस्थाविषये बहिष्मज्ञ सप्ताङ्ग वैश्वानरः शरीर इन्द्रिय इत्यादीनां विचारः कृतः। स्वप्नावस्थाविषये स्वप्नस्थान- अन्तः प्रज्ञ प्रविविवक्तभुकः तैजस - निद्रा अविद्या अविद्याप्रकारादीनाम् आलोचनं विहितम्। अपि च अत्रैव आत्मनः स्वप्नावस्थाविषये गौडपादाचार्यस्य व्याख्यानमुपन्यस्तम्।

आत्मनस्तृतीयावस्था भवति सुषुस्यवस्था। अस्मिनविषये आलोचना वर्तते। अत्र सुपुप्तेः लक्षण प्रज्ञाघन आनन्दमय आनन्दभुक चेतोमुख प्राज्ञ अविद्या इत्यादयः विषयाः चर्चिताः। तुरीयारख्ये आत्मनः तुरीयावस्थामधिकृत्य नान्तः प्राज्ञ न बर्हिप्रज्ञ नोभयतः प्रज्ञ प्रपञ्चोपशम शान्त -ब्रह्मस्वरूप - इत्यादीनामालोचनं विहितम्। वस्तुतस्तु आत्मनः विषये उपनिषत्सु गहनः विचारः वर्तते।

**सहायकग्रन्थसूची -**


> उपनिषद्भाष्यम्,(श्रीशङ्करभगवत्पादाचार्यविरचितम्) श्री. एस्, सुब्रह्मण्यशास्त्रिणः, महेश अनुसन्धान संस्थानम्।

> माण्डूक्योपनिषत् (व्याख्यापञ्चकोपेता), श्री.सि.एन्, सीताराम, संस्कृत संशोधन संसत्, मेलुकोटे, कर्नाटक, 2005

>माण्डूक्योपनिषद्भाष्यम्, श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं (व्याख्यासप्तकोपेतम्)उपाध्याय कृष्णाचार्यः, श्रीजयतीर्थविद्यापीठम्, बेंगलूरु, 19981

>उपनिषत्सु ज्ञानस्वरूपविवेचनम्,डा. के. अरविन्दराव, राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपति, अन्ध्रप्रदेशः, 2012 1

>वेदान्तवार्तिकम्, आचार्यदिगम्बरमहापात्रः, महर्षिवेदविज्ञान-विश्वविद्यालयः, महर्षिनगरम्, गाजियाबादः, उत्तरेप्रदेशः ।

> वेदान्तसारः, (सदानन्दयतिविरचितः), राकेश शास्त्री, परिमल पब्लिकेशन्स, दिल्ली, 2003.

> उपनिषद् (सरल हिन्दी भावार्थ सहित), श्रीराम शर्मा आचार्यः, शान्तिकुञ्ज, हरिद्वार, उत्तरांचल, 2005 ।

> ईशादि नौ उपनिषद्, गीता प्रेस, गोरखपुर ।

> ब्रह्मसूत्र शाङ्करभाष्यम्, श्री शङ्करभगवत्पादाचार्याः राष्ट्रिय संस्कृत संस्थान् दिल्ली 2002.

> भामती-ब्रह्मसूत्रभाष्य व्याख्या, वाचस्पति मिश्रः राष्ट्रिय संस्कृत संस्थान् दिल्ली 2002

>वेदान्त परिभाषा, धर्मराजाध्वरीन्द्रः। शिखामणिः वेदान्तपरिभाषा व्याख्या।

>बृहदारण्यकोपनिषत् भाष्यवार्तिकम्, सुरेश्वराचार्याः- महेष अनुसन्धान संस्थान वाराणसी 1982.

>दशोपनिषव्याख्या, प्रतिपदार्थदीपिका, विवेककलानिधिप्रेस मद्रास। भारद्वाजरामानुजाचार्यविरचिता।

> उपनिषत्षड्कम्, धर्माधिकारी, चक्रवर्ती अव्यङ्गार्यसम्पादितम्, शंकरभाष्यरङ्गरामानुजभाष्ययुतम्, विद्यारङ्गिणी प्रेस, मैसूरु।

>ईशाद्यष्टोपनिषद्भाष्यम्, व. न. कृष्णमाचार्य, रङ्गरामानुज-भाष्योपेतम्, लैजिकर्वर्धिनीसभा।

> दशोपनिषद्भाष्यम्, सुबोधिनी, गोपालनन्दस्वामिविरचितम्, एम्बार् कृष्णामाचार्य, भट्ट जयकृष्णबापूजी, निर्णयसारप्रेसस मुम्बई।

> दशोपनिषद्भाष्यम्, शांकरभाष्यम् मोतीलाल बनारसीदास, बङ्ग्लोरोड् जवाहरनगर, दिल्ली।

>माण्डूक्योपन्यासमञ्जरी, श्रीसच्चिदानन्देसरस्वरी, अध्यात्म-प्रकाशनकार्यालय, होड्ठेनरसीपुर ।

>उपनिषत्सारम्, उत्तमूरु विशिष्टाद्वैतप्रचारिणीसभा, मद्रास। वीरराघवाचार्यः, ईशाद्युपनिषदां QU1:24 (266) सारः।


**पाद टिप्पणी:**

[1]तैत्तिरीयोपनिषद् - 2.1.1
[2]बृहदारण्यकोपनिषद् – 3.4.1
[3]छान्दोग्योपनिषद् 6.2.1
[4]तैत्ति.उ.भाष्यम् – 2.1.1
[5]तैत्तिरीयोपनिषत् – 2.1
[6]छान्दग्योपनिषत् – 6.1.4
[7]बृह.उ. – 3.4.2
[8]ब्रह्मसूत्रभाष्यम् – 1.1.1
[9]न्दग्योपनिषद् – 8.3.2
[10] न्यायसूत्रम् – 3.1.25
[11] वेदान्तपरिभाषा - 281
[12] माण्डुक्योपनिषद् - 3
[13] शंकरभाष्य - 218
[14] आनन्दभाष्यम् - 10
[15] आनन्दगिरिः - 218
[16] ढार्थटीकाटिप्पणी - 28
[17] भाष्यवृत्तिकारः - 29
[18] भाष्यार्थरत्नावलि - 29
[19] प्रतिपदपदार्थदीपिका - 8
[20] प्रकाशिकाका - 9
[21] कूरनारायणभाष्यम् - 8
[22] सुबोधिनीकारः - 14
[23] माण्डुक्योपनिषत् - 8
[24] शंकरभाष्यम् – पृ- 233
[25] शंकरभाष्यव्याख्या.पृ- 233
[26] आनन्दगिरिभाष्यम् पृ - 233
[27] प्रतिपदार्थदीपिका.पृ - 11
[28] आनन्दभाष्य.पृ - 12
[29] कूरनारायणभाष्य.पृ - 12
[30] माण्डुक्योपनिषद. मन्त्र - 5
[31] शंकरभाष्यम्.पृ - 224
[32] प्रतिपदार्थदीपिका.पृ - 12
[33] प्रकाशिकाकारः.पृ - 13
[34] कूरनारायणभाष्यम्.पृ - 13
[35] वृहदारण्यकोपनिषद्. 4.2.2